पुषादिद्युताद्यॢदितः परस्मैपदेषु । (५५/२३४३)

पुषादिभ्यः, [1]द्युतादिभ्यः, लृदिद्भ्यश्च धातुभ्यः परस्य च्लेः परस्मैपदेषु परतः अङादेशो भवति । पुषादिर्दिवाद्यन्तर्गणो गृह्यते, न [2]भ्वादिक्रयाद्यन्तर्गणः । [3]पुष – अपुषत् । द्युतादि – [4]अद्युतत् । अश्वितत् । लृदिद्भ्यः- गम्लृ – अगमत् । शक्लृ – अशकत् । परस्मैपदेषु इति किम् ? व्यद्योतिष्ट । [5]अलोटिष्ट ॥

सर्तिशास्त्यर्तिभ्यश्च । (५६/२३८२)

'सृ गतौ' (धा. पा. ९३६), 'शासु अनुशिष्टौ' (धा.पा. १०७६) 'ऋ गतौ' (धा.पा. ९३७) इत्येतेभ्यः परस्य च्लेः अङादेशो भवति[6] । असरत् । [7]अशिषत् । आरत् । पृथग्योगकरणमात्मनेपदार्थम् । [8]समरन्त (ऋ. ४.१९.९) । चकारः परस्मैपदेषु इत्यनुकर्षणार्थः । तच्चोत्तरत्रोपयोगं यास्यति ॥

इरितो वा । (५७/२२६९)

इरितो धातोः परस्य च्लेः अङादेशो वा भवति । [9]भिदिर् – अभिदत्, अभैत्सीत् । छिदिर् – अच्छिदत्, अच्छैत्सीत् । परस्मैपदेषु इत्येव, अभित्त । [10]अच्छित्त ॥

जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च । (५८/२२९१)

वा इति वर्तते । 'जॄष् वयोहानौ' (धा. पा. ११३१), स्तम्भुः सौत्रो धातुः, 'म्रुचु, म्लुचु गत्यर्थे' (धा. पा. १९५, १९६), 'ग्रुचु, ग्लुचु [11]स्तेयकरणे' (धा. पा. १९७, १९८), 'ग्लुञ्चु, [12]ष्वञ्ज गतौ' (धा. पा. २०१, २०२), 'टुओश्वि गतिवृद्धयोः' (धा. पा. १०११), एतेभ्यो [13]धातुभ्यः परस्य च्लेर्वा अङादेशो भवति । अजरत्, अजारीत् । अस्तभत्, अस्तम्भीत् । अम्रुचत्, अम्रोचीत् । अम्लुचत्, अम्लोचीत् । अग्रुचत्, अग्रोचीत् । अग्लुचत्, अग्लोचीत् । अग्लुञ्चत्, अग्लुञ्चीत् । [14]अश्वत्, अश्वयीत्, अशिश्वियत् ।

ग्लुचुग्लुञ्चोर्[15]रन्यतरोपादानेऽपि रूपत्रयं सिध्यति, अर्थभेदात् तु द्वयोरुपादानं कृतम् । केचित् तु वर्णयन्ति द्वयोरुपादानसामर्थ्याद् ग्लुञ्चेर्[16]नुनासिकलोपो न भवति, अग्लुञ्चत् इति ॥

कृमृदॄरुहिभ्यश्छन्दसि । (५९/३४०६)

कृ मृ दॄ रुहि इत्येतेभ्यः परस्य च्लेः छन्दसि विषये[17] अङादेशो भवति । शकलाङ्गुष्ठकोऽकरत् । [18]अथोऽमरत् । [19]अदरदर्थान् । [20]'सानुमारुहत्' (ऋ. १.१०.२) । [21]'अन्तरिक्षाद् दिवमारुहम्' । (अ. ४.१४.३) । छन्दसि इति किम् ? अकार्षीत् । [22]अमृत । [23]अदारीत् । अरुक्षत् ॥

---

1. द्युतादिभ्यः नास्ति ड. 2. भ्वादि° ड. 3. पुषादि ग. 4. व्यद्युतन् ह, व्यद्योतिष्ट अ. 5. अलोभिष्ट ड. 6. कर्तृवाचिनि लुङि परतः इत्यधिकम् ड. 7. नास्ति ह. 8. समारत ड. 9. भिदिरः ब. 10. आच्छित्त ब, अरुद्ध न्या. 11. स्तेये ह. 12. पस्ज नास्ति ड. 13. धातुभ्यः नास्ति ह. 14. अश्वयत् ह. 15. एकतरोपादानेऽपि अ. ब. क. 16. °रनुनासिकस्य लोपो अ. 17. वा इत्यधिकम् अ ड. फ. 18. अर्थोमरत् अ, अश्मोमरत् ड. 19. अदरत् पर्वतानाम् ह, अदरत् पर्वतान् अ. क. ड. 20. पर्वतम् मुद्रितः पाठः. ड. 21. विमानम् ब. क. 22. वाक्यमिदं नास्ति अ. 23. नास्ति क. ड. ग.